(586) "जभी गात्रविनामे" (I-भ्वादिः-388. अक. सेट्. आत्म.)

'जृम्भणे जम्भते, यामे जम्भेत्, नाशे तु जम्भयेत्॥'

(श्लो. 145) इति देवः।

[1]जम्भकः-म्भिका, जम्भकः-म्भिका, जिजम्भिषकः-षिका, [2]जञ्जभकः-जन्जभकः-भिका;

जम्भिता-त्री, जम्भयिता-त्री, जिजम्भिषिता-त्री, जञ्जभिता-त्री;

— जम्भयन्-न्ती, जम्भयिष्यन्-न्ती-ती; —

जम्भमानः, जम्भयमानः, जिजम्भिषमाणः, जञ्जभ्यमानः;

जम्भिष्यमाणः, जम्भयिष्यमाणः, जिजम्भिषिष्यमाणः, जञ्जभिष्यमाणः;

[3]झप्-झब्-जभौ-जभः;

[4]जब्धम्-जब्धः-जब्धवान्, जभितः, जिजम्भिषितः, जञ्जभितः-तवान्;

जम्भः, [5]साधुजम्भी, जम्भः, जिजम्भिषुः, जञ्जभः;

जम्भितव्यम्, जम्भयितव्यम्, जिजम्भिषितव्यम्, जञ्जभितव्यम्;

जम्भनीयम्, जम्भनीयम्, जिजम्भिषणीयम्, जञ्जभनीयम्;

[6]जभ्यम्, जम्भ्यम्, जिजम्भिष्यम्, जञ्जभ्यम्;

जभ्यमानः, जम्भ्यमानः, जिजम्भिष्यमाणः, जञ्जभ्यमानः;

जम्भः, जम्भः, जिजम्भिषः, जञ्जभः;

जम्भितुम्, जम्भयितुम्, जिजम्भिषितुम्, जञ्जभितुम्;

---

1. 'रधिजभोरचि' (7-1-61) इति अजादिप्रत्ययेषु परेषु नुमागमः।
2. 'लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्' (3-1-24) इति भावगर्हायां यङ्। 'जपजभदहदशभञ्जपशां च' (7-4-86) इत्यभ्यासस्य नुगागमः। 'स च पदान्तवद्वाच्यः' (वा. 7-4-85) इति वचनात् पक्षे, 'वा पदान्तस्य' (8-4-59) इति परसवर्णः। यद्यपि यङोऽकारलोपस्य स्थानिवद्भावेनाजादिप्रत्ययपरकत्वात् सर्वत्राजादिप्रत्ययेषु परेषु नुमागमो भवति। तथापि 'अनिदिताम्—' (6-4-24) इति नकारस्य लोपो भवति।
3. क्विपि, 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (8-2-37) इति भष्भावे चर्त्वविकल्पः।
4. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः। 'झषस्तथोर्धोऽधः' (8-2-40) इति धत्वम्।
5. 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः।
6. 'पोरदुपधात्' (3-1-98) इति यत्प्रत्ययः।